श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ पुष्पपद्धतिः द्वादशी ॥

*This document** has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पुष्पपद्धतिः द्वादशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

शौरेः सञ्चारकालेषु पुष्पवृष्टिर्दिवश्च्युता।
पर्यवस्यति यत्रैव प्रपद्ये तां पदावनीम्॥ १२.१ ॥

दैवतं मम जगत्त्रयार्चिता दिव्यदम्पतिविहारपादुका।
पाणिपादकमलार्पणात् तयोर्या भजत्यनुदिनं सभाजनम्॥ १२.२ ॥

तव रङ्गराजमणिपादु ! नतो विहितार्हणः सुरसरित्पयसा।
अवतंसचन्द्रकलया गिरिशो नवकेतकीदळमिवार्पयति॥ १२.३ ॥

कुसुमेषु समर्पितेषु भक्तैः त्वयि रङ्गेशपदावनि ! प्रतीमः।
शठकोपमुनेस्त्वदेकनाम्नः सुभगं यत् सुरभित्वमस्य नित्यम्॥ १२.४ ॥

पदे परस्मिन् भुवने विधातुः पुण्यैः प्रसूनैः पुळिने सरय्वाः।
मध्ये च पादावनि ! सह्यसिन्धोः आसीच्चतुःस्थानमिवार्चनं ते॥ १२.५ ॥

तवैव रङ्गेश्वरपादरक्षे ! सौभाग्यमव्याहतमाप्तुकामाः।
सुरद्रुमाणां प्रसवैः सुजातैः अभ्यर्चयन्त्यप्सरसो मुहुस्त्वाम्॥ १२.६ ॥

निवेशितां रङ्गपतेः पदाब्जे मन्ये सपर्यां मणिपादरक्षे !।
त्वदर्पणादापतितामपश्यत् गाण्डीवधन्वा गिरिशोत्तमाङ्गे॥ १२.७ ॥

पत्राणि रङ्गनृपतेर्मणिपादरक्षे !
 द्वित्राण्यपि त्वयि समर्प्य विभूतिकामाः।
पर्यायलब्धपुरुहूतपदाः शचीनां
 पत्राङ्कुराणि विलिखन्ति पयोधरेषु॥ १२.८ ॥

निर्वर्तयन्ति तव ये निचितानि पुष्पैः
वैहारिकाण्युपवनानि वसुन्धरायाम्।
कालेन ते कमललोचनपादरक्षे !
क्रीडन्ति नन्दनवने कृतिनः पुमांसः॥ १२.९ ॥

अर्चन्ति ये मधुभिदो मणिपादरक्षे !
भावात्मकैरपि परं भवतीं प्रसूनैः।
मन्दारदामसुभगैर्मकुटैरजस्रं
बृन्दारकाः सुरभयन्ति पदं तदीयम्॥ १२.१० ॥

अस्पृष्टदोषपरिमर्शमलङ्घ्यमन्यैः
हस्तापचेयमखिलं पुरुषार्थवर्गम्।
चित्रं जनार्दनपदावनि ! साधकानां
त्वय्यर्पिताः सुमनसः सहसा फलन्ति॥ १२.११ ॥

वन्दारुभिः सुरगणैस्त्वयि संप्रयुक्ता
माला विभाति मधुसूदनपादरक्षे !।
विक्रान्तविष्णुपदसंश्रयबद्धसख्या
भागीरथीव परिरम्भणकाङ्क्षिणी ते॥ १२.१२ ॥

ये नाम रङ्गनृपतेर्मणिपादुके ! त्वाम्
अभ्यर्चयन्ति कमलैरधिकर्तुकामाः।
आरोपयत्यवहिता नियतिः क्रमात्तान्
कल्पान्तरीयकमलासनपत्रिकासु॥ १२.१३ ॥

त्वय्यर्पितानि मनुजैर्मणिपादरक्षे !
दूर्वाङ्कुराणि सुलभान्यथवा तुलस्यः।
साराधिकाः सपदि रङ्गनरेन्द्रशक्त्या
संसारनागदमनौषधयो भवन्ति॥ १२.१४ ॥

आराध्य नूनमसुरार्दनपादुके ! त्वाम्
आमुष्मिकाय विभवाय सहस्रपत्रैः।

मन्वन्तरेषु परिवर्तिषु देवि ! मर्त्याः
पर्यायतः परिणमन्ति सहस्रनेत्राः॥ १२.१५ ॥

धन्यैस्त्वयि त्रिदशरक्षकपादरक्षे !
पुष्पाणि काञ्चनमयानि समर्पितानि।
विस्रंसिना विनमतो गिरिशोत्तमाङ्गात्
आरग्वधेन मिलितान्यपृथग्भवन्ति॥ १२.१६ ॥

विश्वोपसर्गशमनं त्वयि मन्यमानैः
वैमानिकैः प्रणिहितं मणिपादरक्षे !।
पद्मासहायपदपद्मनखार्चिषस्ते
पुष्पोपहारविभवं पुनरुक्तयन्ति॥ १२.१७ ॥

नाकौकसां शमयितुं परिपन्थिवर्गान्
नाथे पदं त्वयि निवेशयितुं प्रवृत्ते।
त्वत्संश्रितां विजहतस्तुळसीं वमन्ति
प्रस्थानकाहळरवान् प्रथमं द्विरेफाः॥ १२.१८ ॥

रङ्गेशपादपरिभोगसुजातगन्धां
संप्राप्य देवि ! भवतीं सह दिव्यपुष्पैः।
नित्योपदर्शितरसं न किलाद्रियन्ते
नाभीसरोजमपि नन्दनचञ्चरीकाः॥ १२.१९ ॥

प्रागेव काञ्चनपदावनि ! पुष्पवर्षात्
संवर्तिते शमितदैत्यभयैः सुरेन्द्रैः।
पद्मेक्षणस्य पदपद्मनिवेशलाभे
पुष्पाभिषेकमुचितं प्रतिपद्यसे त्वम्॥ १२.२० ॥

दिशि दिशि मुनिपत्न्यो दण्डकारण्यभागे
न जहति बहुमानान्नूनमद्यापि मूलम्।
रघुपतिपदरक्षे ! त्वत्परिष्कारहेतोः
अपचितकुसुमानामाश्रमानोकहानाम्॥ १२.२१ ॥

घटयसि परिपूर्णान् कृष्णमेघप्रचारे
    कृतिभिरुपहितैस्त्वं केतकीगर्भपात्रैः।
वरतनुपरिणामात् वामतः श्यामळानां
    प्रणतिसमयलग्नान् पादुके ! मौळिचन्द्रान्॥ १२.२२ ॥

परिचरणनियुक्तैः पादुके ! रङ्गभर्तुः
    पवनतनयमुख्यैरर्पितां त्वत्समीपे।
विनतविधिमुखेभ्यो निर्विशेषां द्विरेफाः
    कथमपि विभजन्ते काञ्चनीं पद्मपङ्क्तिम्॥ १२.२३ ॥

विधिशिवपुरुहूतस्पर्शितैर्दिव्यपुष्पैः
    त्वयि सह निपतन्तस्तत्तदुद्यानभृङ्गाः।
मधुरिपुपदरक्षे ! मञ्जुभिः स्वैर्निनादैः
    अविदितपरमार्थान् नूनमध्यापयन्ति॥ १२.२४ ॥

प्रशमयति जनानां सज्वरं रङ्गभर्तुः
    परिसरचलितानां पादुके ! चामराणाम्।
अनुदिनमुपयातैरुत्थितं दिव्यपुष्पैः
    निगमपरिमळं ते निर्विशन् गन्धवाहः॥ १२.२५ ॥

अखिलभुवनरक्षानाटिकां दर्शयिष्यन्
    अनिमिषतरुपुष्पैरर्चिते रङ्गमध्ये।
अभिनयमनुरूपं शिक्षयत्यात्मना त्वां
    प्रथमविहितलास्यः पादुके ! रङ्गनाथः॥ १२.२६ ॥

अगळितनिजरागां देवि ! विष्णोः पदं तत्
    त्रिभुवनमहनीयां प्राप्य सन्ध्यामिव त्वाम्।
भवति विबुधमुक्तैः स्पष्टतारानुषङ्गं
    परिसरपतितैस्ते पारिजातप्रसूनैः॥ १२.२७ ॥

व्यञ्जन्त्येते विभवमनघं रञ्जयन्तः श्रुतीर्नः
    प्राध्वं रङ्गक्षितिपतिपदं पादुके ! धारयन्त्याः।

नादैरन्तर्निहितनिगमैर्नन्दनोद्यानभृङ्गाः
दिव्यैः पुष्पैः स्नपितवपुषो देवि ! सौस्नातिकास्ते॥ १२.२८ ॥

किं पुष्पैस्तुळसीदळैरपि कृतं दूर्वाऽपि दूरे स्थिता
त्वत्पूजासु मुकुन्दपादु ! कृपया त्वं कामधेनुः सताम्।
प्रत्यग्राहृतदर्भपल्लवलवग्रासाभिलाषोन्मुखी
धेनुस्तिष्ठतु सा वसिष्ठभवनद्वारोपकण्ठस्थले॥ १२.२९ ॥

चूडारग्वधरजसा चूर्णस्नपनं विधाय ते पूर्वम्।
रङ्गेशपादुके ! त्वामभिषिञ्चति मौळिगङ्गया शम्भुः॥ १२.३० ॥

॥ इति श्रीपादुकासहस्रे पुष्पपद्धतिः द्वादशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥